सहायक आचार्य प्रतियोगी परीक्षा-2024 रक्षपाल गिरि
(संस्कृत शिक्षा विभाग) परीक्षा तिथि- 18/09/2024

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16

पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

**Paper Code : 37**

# PAS-24

**इस प्रश्न-पुस्तिका को तब तक न खोलें जब तक कहा न जाए। Do not open this Question Booklet until you are asked to do so.**

प्रश्न-पुस्तिका संख्या व बारकोड/
**Question Booklet No. & Barcode**

413781

## Sub : Bhasha Vigyan-I
## Paper-I

**समय : 03 घण्टे + 10 मिनट अतिरिक्त***
**Time : 03 Hours + 10 Minutes Extra***

**अधिकतम अंक : 75**
**Maximum Marks : 75**

**प्रश्न-पुस्तिका के पेपर की सील/पॉलिथीन बैग को खोलने पर प्रश्न-पत्र हल करने से पूर्व परीक्षार्थी यह सुनिश्चित कर लें कि :**
- **प्रश्न-पुस्तिका संख्या तथा ओ.एम.आर. उत्तर-पत्रक पर अंकित बारकोड संख्या समान है।**
- **प्रश्न-पुस्तिका एवं ओ.एम.आर. उत्तर-पत्रक के सभी पृष्ठ व सभी प्रश्न सही मुद्रित हैं। समस्त प्रश्न, जैसा कि ऊपर वर्णित है, उपलब्ध हैं तथा कोई भी पृष्ठ कम नहीं है/ मुद्रण त्रुटि नहीं है।**

**किसी भी प्रकार की विसंगति या दोषपूर्ण होने पर परीक्षार्थी वीक्षक से दूसरा प्रश्न-पत्र प्राप्त कर लें। यह सुनिश्चित करने की जिम्मेदारी अभ्यर्थी की होगी। परीक्षा प्रारम्भ होने के 5 मिनट पश्चात् ऐसे किसी दावे/आपत्ति पर कोई विचार नहीं किया जायेगा।**

**On opening the paper seal/polythene bag of the Question Booklet before attempting the question paper, the candidate should ensure that :**
- **Question Booklet Number and Barcode Number of OMR Answer Sheet are same.**
- **All pages & Questions of Question Booklet and OMR Answer Sheet are properly printed. All questions as mentioned above are available and no page is missing/misprinted.**

**If there is any discrepancy/defect, candidate must obtain another Question Booklet from Invigilator. Candidate himself shall be responsible for ensuring this. No claim/objection in this regard will be entertained after five minutes of start of examination.**

## परीक्षार्थियों के लिए निर्देश

1. **प्रत्येक प्रश्न के लिये एक विकल्प भरना अनिवार्य है।**
2. सभी प्रश्नों के अंक समान हैं।
3. प्रत्येक प्रश्न का मात्र **एक** ही उत्तर दीजिए। एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा।
4. **OMR** उत्तर-पत्रक इस प्रश्न-पुस्तिका के अन्दर रखा है। जब आपको प्रश्न-पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्रक निकाल कर ध्यान से केवल **नीले बॉल पॉइंट पेन** से विवरण भरें।
5. कृपया अपना रोल नम्बर ओ.एम.आर. उत्तर-पत्रक पर सावधानीपूर्वक सही भरें। गलत रोल नम्बर भरने पर परीक्षार्थी स्वयं उत्तरदायी होगा।
6. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा।** गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है।
7. **प्रत्येक प्रश्न के पाँच विकल्प दिये गये हैं, जिन्हें क्रमश: 1, 2, 3, 4, 5 अंकित किया गया है। अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले (बबल) को उत्तर-पत्रक पर नीले बॉल पॉइंट पेन से गहरा करना है।**
8. **यदि आप प्रश्न का उत्तर नहीं देना चाहते हैं तो उत्तर-पत्रक में पाँचवें (5) विकल्प को गहरा करें। यदि पाँच में से कोई भी गोला गहरा नहीं किया जाता है, तो ऐसे प्रश्न के लिये प्रश्न अंक का 1/3 भाग काटा जायेगा।**

9.* **प्रश्न-पत्र हल करने के उपरांत अभ्यर्थी अनिवार्य रूप से ओ.एम.आर. उत्तर-पत्रक जाँच लें कि समस्त प्रश्नों के लिये एक विकल्प (गोला) भर दिया गया है। इसके लिये ही निर्धारित समय से 10 मिनट का अतिरिक्त समय दिया गया है।**

10. **यदि अभ्यर्थी 10% से अधिक प्रश्नों में पाँच विकल्पों में से कोई भी विकल्प अंकित नहीं करता है, तो उसको अयोग्य माना जायेगा।**
11. मोबाइल फोन अथवा अन्य किसी इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है। यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी।

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए **राजस्थान सार्वजनिक परीक्षा (भर्ती में अनुचित साधनों की रोकथाम अध्युपाय) अधिनियम, 2022** तथा अन्य प्रभावी कानून एवं आयोग के **नियमों-प्रावधानों** के तहत कार्यवाही की जाएगी। साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है।

## INSTRUCTIONS FOR CANDIDATES

1. **It is mandatory to fill one option for each question.**
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question. If more than one answers are marked, it would be treated as wrong answer.
4. The **OMR** Answer Sheet is inside this Question Booklet. When you are directed to open the Question Booklet, take out the Answer Sheet and fill in the particulars carefully with **Blue Ball Point Pen** only.
5. Please correctly fill your Roll Number in **OMR** Answer Sheet. Candidate will themself be responsible for filling wrong Roll No.
6. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question.
7. **Each question has five options marked as 1, 2, 3, 4, 5. You have to darken only one circle (bubble) indicating the correct answer on the Answer Sheet using BLUE BALL POINT PEN.**
8. **If you are not attempting a question then you have to darken the circle '5'. If none of the five circles is darkened, one third (1/3) part of the marks of question shall be deducted.**

9.* **After solving question paper, candidate must ascertain that he/she has darkened one of the circles (bubbles) for each of the questions. Extra time of 10 minutes beyond scheduled time, is provided for this.**

10. **A candidate who has not darkened any of the five circles in more than 10% questions, shall be disqualified.**
11. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted under **Rajasthan Public Examination (Measures for Prevention of Unfair Means in Recruitment) Act, 2022 & any other laws applicable and Commission's Rules-Regulations.** Commission may also debar him/her permanently from all future examinations.

**उत्तर-पत्रक में दो प्रतियाँ हैं – मूल प्रति और कार्बन प्रति। परीक्षा समाप्ति पर परीक्षा कक्ष छोड़ने से पूर्व परीक्षार्थी उत्तर-पत्रक की दोनों प्रतियाँ वीक्षक को सौंपेंगे, परीक्षार्थी स्वयं कार्बन प्रति अलग नहीं करें। वीक्षक उत्तर-पत्रक की मूल प्रति को अपने पास जमा कर, कार्बन प्रति को मूल प्रति से कट लाइन से मोड़ कर सावधानीपूर्वक अलग कर परीक्षार्थी को सौंपेंगे, जिसे परीक्षार्थी अपने साथ ले जायेंगे। परीक्षार्थी को उत्तर-पत्रक की कार्बन प्रति चयन प्रक्रिया पूर्ण होने तक सुरक्षित रखनी होगी एवं आयोग द्वारा माँगे जाने पर प्रस्तुत करनी होगी।**

1. ऋक्प्रातिशाख्ये सन्ध्यक्षरेषु परिगणितं नास्ति –
(1) ए (2) ऋ
(3) ओ (4) औ
(5) अनुत्तरितः प्रश्नः

2. कण्ठ्य वर्णः कः ?
(1) इ (2) अ
(3) उ (4) लृ
(5) अनुत्तरितः प्रश्नः

3. ऋक्प्रातिशाख्यानुसारेण संयोगसञ्ज्ञा विधायकमस्ति –
(1) संयोगस्तु व्यञ्जनासन्निपातः
(2) संयोगस्तु स्वरसन्निपातः
(3) संयोगस्तु हलूपञ्चकलब्धिः
(4) संयोगस्तु व्यञ्जनसन्निपातः
(5) अनुत्तरितः प्रश्नः

4. ऋक्प्रातिशाख्यानुसारेण "पदं चान्यः" इति सूत्रेण संज्ञा भवति –
(1) प्रगृह्यम् (2) यमः
(3) रक्तः (4) संयोगः
(5) अनुत्तरितः प्रश्नः

5. दीर्घस्वरभक्तेः कालपरिमाणं किम् ?
(1) एकमात्रिकः कालः
(2) द्विमात्रिकः कालः
(3) त्रिमात्रिकः कालः
(4) अर्द्धमात्रिकः कालः
(5) अनुत्तरितः प्रश्नः

6. अघोषवर्णाः सन्ति –
(1) अ, इ, उ (2) य्, र्, ल्, व्
(3) ग्, घ्, ज्, झ् (4) क्, ख्, च्, छ्
(5) अनुत्तरितः प्रश्नः

7. प्रत्येकस्मिन् वर्गे प्रथमद्वितीययोः वर्णयोः संज्ञा का भवति ?
(1) रक्तः (2) स्वरः
(3) अघोषः (4) घोषः
(5) अनुत्तरितः प्रश्नः

8. वागाम्भृणी कस्य दुहिता ?
(1) वाचः (2) अम्भृणस्य
(3) सरस्वत्याः (4) ब्रह्मणः
(5) अनुत्तरितः प्रश्नः

9. ऋक्प्रातिशाख्ये "अनुनासिकोऽन्त्यः" इत्यस्य क आशयः ?
(1) जिह्वामूलीयेषु पूर्वसदृशोऽनुनासिको भवति
(2) उपध्मानीयेषु पूर्वसदृशोऽनुनासिको भवति
(3) प्रत्येकं वर्गस्य अन्तिमवर्णोऽनुनासिको भवति
(4) सन्ध्यक्षरेषु अन्त्यवर्णोऽनुनासिको भवति
(5) अनुत्तरितः प्रश्नः

10. अधोलिखितेषु निर्वचनसिद्धान्तोऽस्ति ?
(1) प्रकृतिप्रत्ययज्ञः निर्वचनं कुर्यात् ।
(2) समासं परिज्ञाय निर्वचनं कुर्यात् ।
(3) साहचर्यन्यायेन परीक्षणं विधाय निर्वचनं कुर्यात् ।
(4) अर्थनित्यः परीक्षेत केनचिद् वृत्तिसामान्येन ।
(5) अनुत्तरितः प्रश्नः

11. 'वीर' शब्दस्य निर्वचनं नास्ति –
(1) वीरयतेर्वा
(2) वेतेर्वा स्यात् गतिकर्मणः
(3) वीरो वीरयति मित्रान्
(4) वीरो वीरयत्यमित्रान्
(5) अनुत्तरितः प्रश्नः

12. षड् भावविकारेषु नास्ति –
(1) जायते (2) वर्द्धते
(3) निर्मीयते (4) अपक्षीयते
(5) अनुत्तरितः प्रश्नः

13. ऊष्मवर्णाः सन्ति –
(1) य्, र्, व्, ल् (2) ङ्, ञ्, ट्, न्
(3) ह्, श्, ष्, स् (4) क्, च्, ट्, प्
(5) अनुत्तरितः प्रश्नः

14. 'नदना इमा भवन्ति शब्दवत्यः' इति कस्य पदस्य निर्वचनम् ?
(1) गगनपदस्य (2) नदीपदस्य
(3) वसुधापदस्य (4) समीरपदस्य
(5) अनुत्तरितः प्रश्नः

15. देवतायाः विवेचनं कस्मिन् काण्डे वर्तते ?
(1) नैघण्टुके (2) दैवते
(3) नैगमे (4) आगमे
(5) अनुत्तरितः प्रश्नः

16. निरुक्तानुसारेण चत्वारि भवन्ति ?
(1) वाक्यानि (2) सूत्राणि
(3) पदजातानि (4) काण्डानि
(5) अनुत्तरितः प्रश्नः

17. तालिकानुसारेण उत्तरं चिनुत –

| | सूची-I | | सूची-II |
|---|---|---|---|
| A. | न निर्बद्धा उपसर्गा अर्थान्निराहुरिति | i. | पूजायाम् |
| B. | उच्चावचाः पदार्था भवन्तीति | ii. | शाकटायनः |
| C. | अति सु इति | iii. | अवकुत्सिते |
| D. | कुल्माषांश्चित् आहरेति | iv. | गार्ग्यः |

| | A | B | C | D |
|---|---|---|---|---|
| (1) | i | ii | iii | iv |
| (2) | ii | iv | i | iii |
| (3) | iv | ii | i | iii |
| (4) | ii | iii | i | iv |

(5) अनुत्तरितः प्रश्नः

18. "न निर्बद्धा उपसर्गा अर्थान्निराहुरिति" इति कस्य मतम् ?
(1) गालवस्य (2) गार्ग्यस्य
(3) औदुम्बरायणस्य (4) शाकटायनस्य
(5) अनुत्तरितः प्रश्नः

19. "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ कौ ?
(1) वर्णविचारनाशौ (2) वर्णप्रकारनाशौ
(3) वर्णागमनाशौ (4) वर्णविकारनाशौ
(5) अनुत्तरितः प्रश्नः

20. सूचीद्वयमाश्रित्य सुमेलयत –

| | | | |
|---|---|---|---|
| i. | आचार्यः | A. | उच्छतीति |
| ii. | ह्रदः | B. | अश्नुतेऽध्वानम् |
| iii. | उषा | C. | आचिनोत्यर्थान् |
| iv. | अश्वः | D. | ह्लादतेः |

| | i | ii | iii | iv |
|---|---|---|---|---|
| (1) | C | D | A | B |
| (2) | C | A | D | B |
| (3) | A | C | D | B |
| (4) | C | A | B | D |

(5) अनुत्तरितः प्रश्नः

21. आदत्ते रसान्, आदत्ते भासं ज्योतिषाम् आदीप्तो भासेति वा इति निर्वचनमस्ति –
(1) अदितिशब्दस्य (2) आदित्यशब्दस्य
(3) दैत्यशब्दस्य (4) वरुणशब्दस्य
(5) अनुत्तरितः प्रश्नः

22. निगमा इमे भवन्ति, छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः ते निगन्तव एव सन्तो निगमनात् इति निर्वचनमस्ति –
(1) निगमशब्दस्य (2) आगमशब्दस्य
(3) निघण्टुशब्दस्य (4) गतिशब्दस्य
(5) अनुत्तरितः प्रश्नः

23. व्याप्तिमत्त्वात् किं सिध्यति ?
(1) शब्दानित्यत्वम्
(2) शब्दनित्यत्वम्
(3) शब्दनित्यानित्यत्वम्
(4) धर्मनित्यत्वम्
(5) अनुत्तरितः प्रश्नः

**24.** निरुक्तं कतिविधं भवति ?

(1) द्विविधम् (2) त्रिविधम्
(3) चतुर्विधम् (4) पञ्चविधम्
(5) अनुत्तरितः प्रश्नः

**25.** पूर्वापरीभूतं भावं केनाचष्टे –

(1) सत्त्वेन (2) निपातेन
(3) उपसर्गेण (4) आख्यातेन
(5) अनुत्तरितः प्रश्नः

**26.** अधोलिखितेषु कथनेषु अश्वपदस्य योग्यं निर्वचनं वर्तते –

i. अश्नुते अध्वानम्
ii. अश्वमिति
iii. धावति इति
iv. महाशनो भवति

(1) i केवलम् (2) ii केवलम्
(3) i, iii केवलम् (4) i, iv केवलम्
(5) अनुत्तरितः प्रश्नः

**27.** अधोलिखितानुसारेण योग्यं विकल्पं चिनुत –

| | | | |
|---|---|---|---|
| i. | ते निगन्तव एव सन्तो निगमनान्निघण्टवः | A. | शाकटायनः |
| ii. | इन्द्रियनित्यं वचनम् | B. | औपमन्यवः |
| iii. | षड्भावविकाराः भवन्तीति | C. | औदुम्बरायणः |
| iv. | तत्र नामानि आख्यातजानि | D. | वार्ष्यायणिः |

| | i | ii | iii | iv |
|---|---|---|---|---|
| (1) | A | B | D | C |
| (2) | B | A | D | C |
| (3) | B | C | D | A |
| (4) | C | B | D | A |

(5) अनुत्तरितः प्रश्नः

**28.** समभिद्रवन्ति एनम् आपः सम्मोदन्तेऽस्मिन् भूतानि इति निर्वचनमस्ति –

(1) द्रवशब्दस्य (2) द्रव्यशब्दस्य
(3) समुद्रशब्दस्य (4) सम्मोदशब्दस्य
(5) अनुत्तरितः प्रश्नः

**29.** 'नास्मिन् रमणं स्थानं अल्पमप्यस्तीति' कस्य निर्वचनम् ?

(1) नरस्य (2) नरकस्य
(3) नखस्य (4) नाकस्य
(5) अनुत्तरितः प्रश्नः

**30.** भाषायाः परिवारमूलकवर्गीकरणं केनाधारेण कृतम् –

(1) केवलं रचनातत्त्वाधारेण
(2) केवलमर्थतत्त्वाधारेण
(3) रचनातत्त्वार्थतत्त्वाधारेण
(4) पदकृत्याधारेण
(5) अनुत्तरितः प्रश्नः

**31.** भाषायाः व्युत्पत्तिरस्ति –

(1) भाष्यते अव्यक्तवाग्रूपेण अभिव्यज्यते इति भाषा
(2) भाष्यतेऽव्यक्तरूपेण अभिभाष्यते इति भाषा
(3) भाष्यते व्यक्तवाग्रूपेण अभिव्यज्यते इति भाषा
(4) अपभाष्यते व्यक्तवाग्रूपेण अभिव्यज्यते इति भाषा
(5) अनुत्तरितः प्रश्नः

**32.** भाषाविज्ञानाय आङ्ग्लभाषायां "लिंग्विस्टिक्स (Linguistics)" शब्दे "लिंगुआ (Lingua)" शब्दः कस्याः भाषायाः अस्ति ?

(1) फारसीभाषायाः
(2) आङ्ग्लभाषायाः
(3) ग्रीकभाषायाः
(4) लैटिनभाषायाः
(5) अनुत्तरितः प्रश्नः

**33.** "तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यम्" इत्यत्र तदिदम् इति पदेन किं लक्ष्यते ?

(1) शब्दनित्यता
(2) निर्वचनसिद्धान्तः
(3) निरुक्तशास्त्रम्
(4) व्याकरणशास्त्रम्
(5) अनुत्तरितः प्रश्नः

34. ग्रिमनियमः कया सम्बद्धोऽस्ति –
(1) मूलभारोपीयभाषया
(2) मन्दारिनभाषया
(3) काकेशियनभाषया
(4) फारसीभाषया
(5) अनुत्तरितः प्रश्नः

35. अर्थपरिवर्तनस्य प्रमुखदिशः सन्ति –
(1) अष्टौ दिशः
(2) पञ्च दिशः
(3) तिस्रः दिशः
(4) चतस्रः दिशः
(5) अनुत्तरितः प्रश्नः

36. "ग्रिमनियमः" इतिनाम केन प्रदत्तम् –
(1) प्रो. इरेमहोदयेन
(2) प्रो. रास्कमहोदयेन
(3) प्रो. ओटो–येस्पर्सनमहोदयेन
(4) प्रो. मैक्समूलरमहोदयेन
(5) अनुत्तरितः प्रश्नः

37. केन्टुम् वर्गस्य का भाषा अधोनिर्दिष्टेषु वर्तते ?
(1) लेटिन् (2) संस्कृतम्
(3) फारसी (4) अवेस्ता
(5) अनुत्तरितः प्रश्नः

38. वैदिकी भाषा अस्ति –
(1) अयोगात्मिका
(2) प्रश्लिष्टयोगात्मिका
(3) श्लिष्टयोगात्मिका
(4) अश्लिष्टयोगात्मिका
(5) अनुत्तरितः प्रश्नः

39. आकृतिमूलकवर्गीकरणं भवति –
(1) शब्दप्रधानम्
(2) शब्दरचनातत्त्वप्रधानम्
(3) अर्थप्रधानम्
(4) शब्दार्थप्रधानम्
(5) अनुत्तरितः प्रश्नः

40. अर्थापकर्षस्य उदाहरणमस्ति –
(1) मुग्धः (2) गोष्ठी
(3) सभ्यः (4) असुरः
(5) अनुत्तरितः प्रश्नः

41. "कुशलः" शब्दः उदाहरणमस्ति –
(1) अर्थविस्तारस्य (2) अर्थसंकोचस्य
(3) अर्थादेशस्य (4) अर्थापकर्षस्य
(5) अनुत्तरितः प्रश्नः

42. धधौ–दधौ इति कस्य परिवर्तनस्य उदाहरणमस्ति ?
(1) महाप्राणीकरणस्य
(2) अल्पप्राणीकरणस्य
(3) घोषीकरणस्य
(4) अघोषीकरणस्य
(5) अनुत्तरितः प्रश्नः

43. समीकरणं भवति –
(1) पुरोगामी–पश्चगामी च
(2) लोपः
(3) आगमः
(4) वर्णविपर्ययः
(5) अनुत्तरितः प्रश्नः

44. ध्वनिपरिवर्तनस्य बाह्यकारणमाधृत्य अधस्तनेषु योग्य विकल्पं चिनुत –
i. भौगोलिक प्रभावः
ii. सामाजिकपरिस्थितयः
iii. लिपिदोषः
iv. बलाघातः
(1) i केवलम्
(2) i, ii, iii केवलम्
(3) i, ii केवलम्
(4) i, ii, iii, iv सर्वाणि
(5) अनुत्तरितः प्रश्नः

45. आसु का भाषा "पूर्वान्त–योगात्मक" भाषा वर्तते ?
(1) काफिर (2) तुर्की
(3) मफोर (4) सन्थाली
(5) अनुत्तरितः प्रश्नः

46. भारोपीयपरिवारस्य भाषाणां शतम्-वर्गे एकस्याः भाषायाः चयनं कुरुत –
(1) लैटिन
(2) ग्रीक
(3) लिथुआनियन
(4) केल्टिक
(5) अनुत्तरितः प्रश्नः

47. सामान्यरूपेण भारोपीयपरिवारस्य कियत्यः शाखाः स्वीक्रियन्ते ?
(1) 10 (2) 20
(3) 14 (4) 17
(5) अनुत्तरितः प्रश्नः

48. वैदिकसंस्कृतस्य विषये सत्यकथनं चिनुत –
(1) लृस्वरस्य प्रयोगः नासीत्
(2) स्वरप्रयोगः बलाघातात्मकः आसीत्
(3) शब्दरूपेषु वैविध्यं न प्राप्यते
(4) लेट्लकारस्य प्रयोगो वर्तते ।
(5) अनुत्तरितः प्रश्नः

49. वैदिकसंस्कृतस्य विषये किमसत्यम्?
A. उपसर्गाणां स्वातन्त्र्यमासीत्
B. लुङ्लङादिलकारेषु अडाडागमौ अनिवार्यौ नास्ताम्
C. छन्दःपूर्तये स्वरभक्तिः न प्रयुज्यते स्म
D. पुरुषलकारादिव्यत्ययः न दृश्यते
(1) A, B केवलम्
(2) B, C केवलम्
(3) C, D केवलम्
(4) A, D केवलम्
(5) अनुत्तरितः प्रश्नः

50. ध्वनिपरिवर्तनस्य कति प्रमुखकारणानि सन्ति –
(1) द्विकारणम्
(2) त्रिकारणम्
(3) एककारणम्
(4) चतुःकारणम्
(5) अनुत्तरितः प्रश्नः

51. लौकिकसंस्कृते किं प्राप्यते ?
A. विसर्जनीयः
B. उदात्तादिस्वराः
C. अनुस्वारः
D. जिह्वामूलीयः
(1) A, B, C केवलम्
(2) B, C, D केवलम्
(3) A, C केवलम्
(4) B, D केवलम्
(5) अनुत्तरितः प्रश्नः

52. संस्कृतभाषा कीदृशी अस्ति ?
(1) श्लिष्टयोगात्मक – बहिर्मुखी संयोगात्मिका
(2) श्लिष्टयोगात्मक – बहिर्मुखी वियोगात्मिका
(3) पूर्णप्रश्लिष्टयोगात्मिका
(4) श्लिष्टयोगात्मक – अन्तर्मुखी संयोगात्मिका
(5) अनुत्तरितः प्रश्नः

53. अधोलिखितेषु अयोगात्मक–भाषा नास्ति –
(1) अनामी
(2) चेरोकी
(3) बर्मी
(4) सूडानी
(5) अनुत्तरितः प्रश्नः

54. लौकिकसंस्कृतस्य विषये किमसत्यम् ?
(1) ग्वङ् ध्वनिः न प्राप्यते
(2) स्वरप्रयोगः संगीतात्मकः अस्ति
(3) अडाडागमाभावः माङ्योगे एव प्राप्यते
(4) लृस्वरस्य प्रयोगः लुप्तप्रायः अस्ति
(5) अनुत्तरितः प्रश्नः

55. शतम्-केन्टुमितिवर्गद्वये भारोपीयभाषाणां विभजनं केन कृतम् ?
(1) अस्कोली महोदयेन
(2) विलियम जोन्समहोदयेन
(3) कार्ल वर्नरमहोदयेन
(4) याकोबी ग्रिममहोदयेन
(5) अनुत्तरितः प्रश्नः

56. कथनकारणाधारेण समीचीनं विकल्पं चिनुत –
कथनम् – आंग्लभाषा भारोपीयपरिवारे परिगण्यते ।
कारणम् – केवलं स्थानसामीप्यात् ।
(1) कथनं सत्यम्, कारणमपि सत्यम्
(2) कथनं सत्यम्, कारणमसत्यम्
(3) कथनमसत्यम्, कारणं सत्यम्
(4) कथनमपि असत्यम्, कारणमपि असत्यम्
(5) अनुत्तरितः प्रश्नः

57. समीचीनं विकल्पं चिनुत –
कथनम् – बर्मीभाषा योगात्मकभाषा अस्ति ।
कारणम् – बर्मीभाषायां प्रकृति-प्रत्ययविभागः प्राप्यते ।
(1) कथनं सत्यम्, कारणमपि सत्यम्
(2) कथनं सत्यम्, कारणमसत्यम्
(3) कथनमसत्यम्, कारणं सत्यम्
(4) कथनमपि असत्यम्, कारणमपि असत्यम्
(5) अनुत्तरितः प्रश्नः

58. तालिकां विलोक्य उचितं विकल्पं चिनुत –

| | तालिका-I | | तालिका-II |
|---|---|---|---|
| i. | स्यामी | A. | द्रविडपरिवारः |
| ii. | अवेस्ता | B. | अयोगात्मक भाषा |
| iii. | ग्रीकः | C. | केन्टुम् वर्ग |
| iv. | मलयालमः | D. | सतम् वर्ग |

| | i | ii | iii | iv |
|---|---|---|---|---|
| (1) | A | B | C | D |
| (2) | B | D | C | A |
| (3) | B | C | A | D |
| (4) | C | B | D | A |

(5) अनुत्तरितः प्रश्नः

59. कथनकारणे वीक्ष्य समीचीनं विकल्पं चिनुत –
कथनम् – संस्कृतभाषायाः 'नीम' इति शब्दस्य स्थाने हिन्दी-भाषायां 'निम्ब' इति प्रयुज्यते ।
कारणम् – मध्ये व्यञ्जनागमेन ।
(1) कथनं सत्यम्, कारणमपि सत्यम्
(2) कथनं सत्यम्, कारणमसत्यम्
(3) कथनमसत्यम्, कारणं सत्यम्
(4) कथनमसत्यम्, कारणमपि असत्यम्
(5) अनुत्तरितः प्रश्नः

60. समीचीनं विकल्पं चिनुत –
कथनम् – संस्कृतस्य ऊष्मध्वनयः 'संघर्षी' मन्यन्ते ।
कारणम् – एतेषामुच्चारणे प्राणवायुः स्वरवद् निर्बाधगत्या मुखतः बहिरागच्छति ।
(1) कथनं सत्यम्, कारणमपि सत्यम्
(2) कथनं सत्यम्, कारणमसत्यम्
(3) कथनमसत्यम्, कारणं सत्यम्
(4) कथनमसत्यम्, कारणमपि असत्यम्
(5) अनुत्तरितः प्रश्नः

61. संघर्षीध्वनिः अस्ति –
(1) च्-ध्वनिः
(2) ल्-ध्वनिः
(3) र-ध्वनिः
(4) श्-ध्वनिः
(5) अनुत्तरितः प्रश्नः

62. समीचीनं विकल्पं चिनुत –
कथनम् – 'आस्तीन का सांप' इत्यत्र 'सांप' शब्दस्य अर्थपरिवर्तनं संजातम् ।
कारणम् – गुणसाम्यमूलकप्रयोगत्वात् ।
(1) कथनं सत्यम्, कारणमपि सत्यम्
(2) कथनं सत्यम्, कारणमसत्यम्
(3) कथनमसत्यम्, कारणं सत्यम्
(4) कथनमसत्यम्, कारणमपि असत्यम्
(5) अनुत्तरितः प्रश्नः

**63.** "सतम्" शब्दः कस्या भाषायाः शब्दोऽस्ति ?
(1) अवेस्ताभाषायाः
(2) ग्रीकभाषायाः
(3) लैटिनभाषायाः
(4) जर्मनभाषायाः
(5) अनुत्तरितः प्रश्नः

**64.** कथनम्-1 वैदिकसंस्कृते लेट्लकारस्याभावः वर्तते ।
कथनम्-2 लौकिकसंस्कृते लेट्लकारस्य प्रयोगः भवति ।
उपर्युक्त वाक्यद्वयमाश्रित्य समुचितं कथनं चिनुत ।
(1) प्रथमकथनम् सत्यमस्ति ।
(2) प्रथमकथनमसत्यमस्ति परन्तु द्वितीयं सत्यमस्ति ।
(3) प्रथमकथनं सत्यमस्ति परन्तु द्वितीयम् असत्यमस्ति ।
(4) प्रथमकथनमसत्यमस्ति द्वितीयमपि असत्यमस्ति ।
(5) अनुत्तरितः प्रश्नः

**65.** ब्राह्मीलिपेः दक्षिणशैल्याः संवर्गे परिगणिता लिपिरस्ति–
(1) शारदालिपिः
(2) बंगलालिपिः
(3) नागरीलिपिः
(4) ग्रन्थलिपिः
(5) अनुत्तरितः प्रश्नः

**66.** ध्वनिपरिवर्तनस्य आभ्यन्तरकारणेषु प्रमुख-कारणमस्ति –
(1) अशिक्षा
(2) लघूकरणस्य प्रवृत्तिः
(3) प्रयत्नलाघवं मुखसुखं वा
(4) अनुकरणस्य अपूर्णता
(5) अनुत्तरितः प्रश्नः

**67.** लेखनेतिहासस्य प्रथमं सोपानं मन्यते –
(1) वर्णिकलिपिः
(2) आक्षरिकलिपिः
(3) सूत्रलिपिः
(4) चित्रलिपिः
(5) अनुत्तरितः प्रश्नः

**68.** अधोऽङ्कितेषु सिन्धुघाटीलिपेः उत्पत्तिसिद्धान्तः नास्ति–
(1) द्रविड-उत्पत्तिः
(2) ब्राह्मी-उत्पत्तिः
(3) सुमेरी-उत्पत्तिः
(4) आर्य-उत्पत्तिः
(5) अनुत्तरितः प्रश्नः

**69.** अशोकस्य शिलालेखेषु प्रामुख्येन कस्याः लिपेः प्रयोगो विहितोऽस्ति ?
(1) शारदालिपेः
(2) अर्धमागधीलिपेः
(3) ब्राह्मीलिपेः
(4) नागरीलिपेः
(5) अनुत्तरितः प्रश्नः

**70.** पन्नवणासूत्रग्रन्थे कति-प्राचीन-लिपीनामुल्लेखः विहितः ?
(1) अष्टादशलिपीनाम्
(2) चतुःषष्टिलिपीनाम्
(3) विंशतिलिपीनाम्
(4) पञ्चविंशतिलिपीनाम्
(5) अनुत्तरितः प्रश्नः

**71.** कः पुरातत्त्ववेत्ता सेमिटिकतः भारतीय-प्राचीनब्राह्मीलिपेः उत्पत्तिम् मन्यते ?
(1) बर्नेलमहोदयः
(2) बूलरमहोदयः
(3) मॅक्समूलरमहोदयः
(4) कर्नलजेम्सटॉडमहोदयः
(5) अनुत्तरितः प्रश्नः

72. कठोरं लिप्यासनं न वर्तते ?
(1) पाषाणमयम्
(2) मृण्मयम्
(3) ताडपत्रम्
(4) ताम्रपत्रम्
(5) अनुत्तरितः प्रश्नः

73. खरोष्ट्रीलिपेः प्राचीनतमः अभिलेखः अस्ति –
(1) स्कन्दगुप्तस्य जूनागढ़ – अभिलेखः
(2) अशोकस्य गिरनार – अभिलेखः
(3) शहबाजगढी – अभिलेखः
(4) पिपरवा–बौद्ध – अभिलेखः
(5) अनुत्तरितः प्रश्नः

74. आकृत्याश्रिताः पाण्डुलिपयः कतिविधाः भवन्ति ?
(1) नवविधाः
(2) अष्टविधाः
(3) सप्तविधाः
(4) पञ्चविधाः
(5) अनुत्तरितः प्रश्नः

75. उद्योतनाम्नी टीका कस्मिन् अस्ति ?
(1) महाभाष्ये
(2) दीपिकायाम्
(3) उद्योतने
(4) प्रदीपे
(5) अनुत्तरितः प्रश्नः

76. नागेशभट्टस्य गुरोः नाम किम् ?
(1) भट्टोजिदीक्षितः
(2) हरिनारायणदीक्षितः
(3) अप्पयदीक्षितः
(4) हरिदीक्षितः
(5) अनुत्तरितः प्रश्नः

77. राजस्थानराज्याभिलेखागारं कस्मिन् नगरे विद्यते ?
(1) जयपुरे (2) जोधपुरे
(3) बीकानेरनगरे (4) गङ्गानगरे
(5) अनुत्तरितः प्रश्नः

78. 'सिद्धहैमशब्दानुशासनम्' कस्य कृतिरस्ति ?
(1) रामचन्द्रसूरेः
(2) हेमचन्द्रसूरेः
(3) मल्लवादिसूरेः
(4) क्षीरस्वामिनः
(5) अनुत्तरितः प्रश्नः

79. 'महाभाष्यदीपिकायाः' कर्ता कः ?
(1) पतञ्जलिः
(2) नागेशभट्टः
(3) कैयटः
(4) भर्तृहरिः
(5) अनुत्तरितः प्रश्नः

80. अष्टाध्यायीसूत्रेषु शाकटायनस्य नाम कति वारं प्राप्यते ?
(1) एकवारम्
(2) त्रिवारम्
(3) चतुर्वारम्
(4) द्विवारम्
(5) अनुत्तरितः प्रश्नः

81. काशिकाविवरणपञ्जिकायाः अपरं नाम किम् ?
(1) न्यासः
(2) न्यायमञ्जरी
(3) पदमञ्जरी
(4) भाषावृत्तिः
(5) अनुत्तरितः प्रश्नः

82. महाभाष्ये कति आह्निकानि सन्ति ?
(1) चतुरशीतिः
(2) द्वाशीतिः
(3) पञ्चाशीतिः
(4) नव
(5) अनुत्तरितः प्रश्नः

83. वाक्यकारः कोऽस्ति ?
(1) कात्यायनः (2) पतञ्जलिः
(3) पाणिनिः (4) भर्तृहरिः
(5) अनुत्तरितः प्रश्नः

84. पाणिनिराचार्यः कुत्रत्यः ?
(1) तक्षशिलादेशीयः
(2) गोनर्दीयः
(3) कान्यकुब्जः
(4) शालातुरीयः
(5) अनुत्तरितः प्रश्नः

85. याज्ञवल्क्यस्मृत्यनुसारेण "यस्मिन्यज्ञानुष्ठाने वितते ऋत्विजे यथाशक्त्यलंकृता कन्या दीयते" सः कः विवाहः उच्यते ?
(1) आर्षविवाहः
(2) प्राजापत्यविवाहः
(3) दैवविवाहः
(4) आसुरविवाहः
(5) अनुत्तरितः प्रश्नः

86. याज्ञवल्क्यस्मृत्यनुसारेण विवाहेषु नास्ति –
(1) दैवः
(2) आर्षः
(3) ऋषिः
(4) प्राजापत्यः
(5) अनुत्तरितः प्रश्नः

87. याज्ञवल्क्यस्मृत्यनुसारेण कुसीदकृषिवाणिज्यपाशुपाल्यं कर्म कस्य विहितम् ?
(1) ब्राह्मणस्य
(2) क्षत्रियस्य
(3) वैश्यस्य
(4) शूद्रस्य
(5) अनुत्तरितः प्रश्नः

88. कः 'प्रौढमनोरमा' टीकां विरचितवान् ?
(1) अप्पयदीक्षितः
(2) वरदराजः
(3) नागेशभट्टः
(4) भट्टोजिदीक्षितः
(5) अनुत्तरितः प्रश्नः

89. 'क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम्' इत्ये तत्सर्वं परगृहे का न कुर्यात् ?
(1) परकीया
(2) प्रोषितभर्तृका
(3) प्रगल्भा
(4) गणिका
(5) अनुत्तरितः प्रश्नः

90. श्रुतिस्मृतिसदाचारः स्वस्य च प्रियमित्यादीनि कस्य लक्षणं भवति ?
(1) अधर्मस्य
(2) सुखस्य
(3) अदृष्टस्य
(4) धर्मस्य
(5) अनुत्तरितः प्रश्नः

91. याज्ञवल्क्यस्मृत्यनुसारेण ब्राह्मणक्षत्रियवैश्यबालका-नामुपनयनस्य निर्धारितकाले व्यतीते सति ते किं संज्ञकाः भवन्ति –
(1) उत्तमाः
(2) व्रात्याः
(3) देवाः
(4) अधमाः
(5) अनुत्तरितः प्रश्नः

92. याज्ञवल्क्यस्मृत्यनुसारेण गोब्राह्मणानलान्नानां केन अङ्गेन स्पर्शं न कुर्यात् –
(1) हस्तेन
(2) पादेन
(3) शिरसा
(4) जानुना
(5) अनुत्तरितः प्रश्नः

93. 'अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलम्' इत्यनेन कस्य यज्ञस्य सङ्केतः विहितः ?
(1) मातृ–पितृयज्ञः
(2) ऋषि–पितृयज्ञः
(3) देव–पितृयज्ञः
(4) पितृ–अतिथियज्ञः
(5) अनुत्तरितः प्रश्नः

94. भगवद्गीतायाः द्वितीयाध्याये कति श्लोकाः ?
(1) चतुःषष्टिः
(2) चतुस्सप्ततिः
(3) द्वाशीतिः
(4) द्विसप्ततिः
(5) अनुत्तरितः प्रश्नः

95. "सीदन्ति मम गात्राणि मुखं च परिशुष्यति" इति केनोक्तम् –
(1) अर्जुनेन
(2) कृष्णेन
(3) सञ्जयेन
(4) धृतराष्ट्रेण
(5) अनुत्तरितः प्रश्नः

96. अर्जुनस्य मतेन कुलधर्माः कीदृशाः भवन्ति ?
(1) प्राक्तनाः (2) सनातनाः
(3) नूतनाः (4) सायन्तनाः
(5) अनुत्तरितः प्रश्नः

97. पाञ्चजन्यदेवदत्ताख्यौ शङ्खौ कयोः आस्ताम् ?
(1) नकुलसहदेवयोः
(2) भीमयुधिष्ठिरयोः
(3) कृष्णार्जुनयोः
(4) भीमार्जुनयोः
(5) अनुत्तरितः प्रश्नः

98. 'य एनं वेत्ति हन्तारम्' इत्यत्र एनं पदेन ज्ञायते ?
(1) इन्द्रियम् (2) मनः
(3) चित्तम् (4) आत्मा
(5) अनुत्तरितः प्रश्नः

99. सम्मोहात् किं जायते ?
(1) सङ्गः
(2) कामः
(3) स्मृतिविभ्रमः
(4) बुद्धिनाशः
(5) अनुत्तरितः प्रश्नः

100. निःस्पृहो निर्ममो निरहङ्कारः किं प्राप्नोति ?
(1) सम्पत्तिम्
(2) विविधविधाम्
(3) ऐश्वर्यम्
(4) शान्तिम्
(5) अनुत्तरितः प्रश्नः

101. विभीषणस्य ज्येष्ठायाः कन्यायाः नाम किम् ?
(1) पृथुपादी
(2) गोकर्णी
(3) कला
(4) गोमुखी
(5) अनुत्तरितः प्रश्नः

102. का राक्षसी सीतायै सान्त्वनां दत्तवती ?
(1) एकजटा
(2) हरिजटा
(3) विकटा
(4) त्रिजटा
(5) अनुत्तरितः प्रश्नः

103. हनूमद्वचनेन रथकुञ्जरवाजिमान् कः ?
(1) रामः (2) रावणः
(3) दशरथः (4) मेघनादः
(5) अनुत्तरितः प्रश्नः

104. अशोकवनिकायां युद्धसमये हनुमान् कं रावणपुत्रं हतवान् ?
(1) नरान्तकम् (2) अक्षकुमारम्
(3) देवान्तकम् (4) प्रहस्तम्
(5) अनुत्तरितः प्रश्नः

105. गीतायां सांख्ययोगो नाम कतमोऽध्यायः ?
(1) तृतीयोऽध्यायः
(2) नवमोऽध्यायः
(3) द्वितीयोऽध्यायः
(4) प्रथमोऽध्यायः
(5) अनुत्तरितः प्रश्नः

106. 'पितामहमहेन्द्राभ्यां रक्षितस्यानिलेन च' इत्यत्र रक्षितपदेन कः अभिप्रेतः ?
(1) सुग्रीवः
(2) जाम्बवान्
(3) हनूमान्
(4) अङ्गदः
(5) अनुत्तरितः प्रश्नः

107. दशग्रीवस्य सेनानायकः नास्ति –
(1) विरूपाक्षः
(2) दुर्धरः
(3) प्रघसः
(4) दधिमुखः
(5) अनुत्तरितः प्रश्नः

108. 'प्लवमानं तु तं दृष्ट्वा सिंहिका नाम राक्षसी' इत्यत्र 'तं' पदेन कः ज्ञायते ?
(1) पर्वतः
(2) अङ्गदः
(3) हनूमान्
(4) सुग्रीवः
(5) अनुत्तरितः प्रश्नः

109. "प्रथमे हि विद्वांसो वैय्याकरणाः" कस्येयमुक्तिः ?
(1) आनन्दवर्धनस्य
(2) पतञ्जलेः
(3) दण्डिनः
(4) भारवेः
(5) अनुत्तरितः प्रश्नः

110. सीता स्वकीयसमक्षं किम् अन्तरतःकृत्वा रावणाय प्रत्युत्तरं दत्तवती ?
(1) वृक्षशाखाम्
(2) वृक्षपत्राणि
(3) तृणम्
(4) पाषाणखण्डम्
(5) अनुत्तरितः प्रश्नः

111. सरस्वती महतां कवीनां कम् अभिव्यनक्ति –
(1) प्रतिभाविशेषम्
(2) छन्दोविशेषम्
(3) वर्णरचनानुप्रासविशेषम्
(4) रीतिविशेषम्
(5) अनुत्तरितः प्रश्नः

112. कथम्भूतः शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयीभवति –
(1) उक्त्यन्तराशक्यचारुत्वप्रकाशकः
(2) उक्त्यन्तरशक्यचारुत्वप्रकाशकः
(3) उक्तिविशेषशक्यचारुत्वप्रकाशकः
(4) उक्तिसामान्यशक्यचारुत्वप्रकाशकः
(5) अनुत्तरितः प्रश्नः

113. "सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥"
पद्यमिदं कस्मिन् प्रसङ्गे उदाहृतम् ?
(1) विवक्षितवाच्यस्य
(2) विवक्षितान्यपरवाच्यस्य
(3) अविवक्षितवाच्यस्य
(4) विवक्षितवाच्यव्यङ्ग्यस्य
(5) अनुत्तरितः प्रश्नः

114. आनन्दवर्धनविरचितः ग्रन्थः नास्ति –
(1) विषमबाणलीला
(2) अर्जुनचरितम्
(3) देवीशतकम्
(4) सूर्यशतकम्
(5) अनुत्तरितः प्रश्नः

115. प्रतीयमानोऽर्थः केन अनुभूयते ?
(1) शब्दशास्त्रज्ञेन
(2) वाच्यार्थविदा
(3) काव्यार्थतत्त्वज्ञेन
(4) आप्तपुरुषेण
(5) अनुत्तरितः प्रश्नः

116. ध्वन्यालोकस्य 'लोचन' टीका केन प्रणीता ?
(1) अभिनवगुप्तेन
(2) आनन्दवर्धनेन
(3) विश्वनाथेन
(4) महिमभट्टेन
(5) अनुत्तरितः प्रश्नः

117. अधोलिखिततालिकानुसारेण समुचितं विकल्पं चिनुत –

| | | | |
|---|---|---|---|
| i. | कार्यावस्था | A. | नृत्तम् |
| ii. | निर्वहणम् | B. | चतुर्दश |
| iii. | भावाश्रयम् | C. | पञ्च |
| iv. | ताललयाश्रयम् | D. | नृत्यम् |

**विकल्प :**

| | i | ii | iii | iv |
|---|---|---|---|---|
| (1) | A | B | C | D |
| (2) | C | D | B | A |
| (3) | D | C | B | A |
| (4) | C | B | D | A |

(5) अनुत्तरितः प्रश्नः

118. अवस्थानुकृतिः इति लक्षणमस्ति –
(1) नाट्यस्य (2) नृत्यस्य
(3) नृत्तस्य (4) रूपस्य
(5) अनुत्तरितः प्रश्नः

119. व्याकीर्णे मन्दबुद्धीनां किं भवति ?
(1) मार्गविभ्रमः
(2) धर्मविभ्रमः
(3) दिग्विभ्रमः
(4) मतिविभ्रमः
(5) अनुत्तरितः प्रश्नः

120. महाकवीनां महाकवित्वलाभः कथं भवति ?
(1) लक्ष्यलक्षकाभ्याम्
(2) व्यङ्ग्यव्यञ्जकाभ्याम्
(3) वाच्यवाचकाभ्याम्
(4) अभिधेयाभिधायकाभ्याम्
(5) अनुत्तरितः प्रश्नः

121. गुणाख्यानं किम् ?
(1) परिन्यासः
(2) परिक्रिया
(3) विलोभनम्
(4) समाधानम्
(5) अनुत्तरितः प्रश्नः

122. "उपायापायशङ्काभ्यां कस्याः प्राप्तिः सम्भाव्यते" ?
(1) प्राप्त्याशायाः
(2) नियताप्त्याशायाः
(3) आरम्भस्य
(4) यत्नस्य
(5) अनुत्तरितः प्रश्नः

123. प्रतिमुखसन्धेरङ्गानि भवन्ति –
(1) चतुर्दश
(2) त्रयोदश
(3) द्वादश
(4) एकादश
(5) अनुत्तरितः प्रश्नः

124. किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येकस्तत् किम् ?
(1) अपवारितम्
(2) आकाशभाषितम्
(3) जनान्तिकम्
(4) स्वगतम्
(5) अनुत्तरितः प्रश्नः

125. 'त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च" इत्यत्र त्रिवर्गे के अन्तर्भूताः ?
(1) मोक्षार्थकामाः
(2) धर्मार्थकामाः
(3) अर्थकाममोक्षाः
(4) धर्मकाममोक्षाः
(5) अनुत्तरितः प्रश्नः

**126.** "वेद मासो धृतव्रतो द्वादश प्रजारतः" इत्यादिमन्त्रे "धृतव्रतः" इति कस्य विशेषणम् ?

(1) रुद्रस्य (2) सूर्यस्य

(3) इन्द्रस्य (4) वरुणस्य

(5) अनुत्तरितः प्रश्नः

**127.** वरुणसूक्तस्य ऋषिः कः ?

(1) शुनःशेपः (2) कक्षीवान्

(3) विश्वामित्रः (4) वागाम्भृणी

(5) अनुत्तरितः प्रश्नः

**128.** उषस्–सूक्तस्य किं छन्दः ?

(1) जगती (2) त्रिष्टुप्

(3) बृहती (4) पङ्क्तिः

(5) अनुत्तरितः प्रश्नः

**129.** "उषः प्रतीची भुवनानि विश्वोर्ध्वा तिष्ठस्यमृतस्य केतुः" इत्यादिमन्त्रे केतुशब्दस्य कोऽर्थः ?

(1) ग्रहविशेषः (2) निवेशयित्री

(3) प्रज्ञापयित्री (4) प्रतिष्ठापयित्री

(5) अनुत्तरितः प्रश्नः

**130.** पर्जन्यसूक्तस्य ऋषिः कोऽस्ति ?

(1) कुत्स–ऋषिः

(2) वामदेव–ऋषिः

(3) अत्रि–ऋषिः

(4) विश्वामित्र–ऋषिः

(5) अनुत्तरितः प्रश्नः

**131.** "मृडीकायोरूचक्षसम्" इत्यादिमन्त्रे 'उरूचक्षस्' शब्दस्य कोऽर्थः ?

(1) सर्वश्रोतारम् (2) बहूनां द्रष्टारम्

(3) सर्वतो बलवन्तम् (4) सर्वनियन्तारम्

(5) अनुत्तरितः प्रश्नः

**132.** वाक्सूक्तस्य ऋषिः कः ?

(1) कुत्स–ऋषिः (2) शुनःशेप–ऋषिः

(3) अत्रि–ऋषिः (4) वागाम्भृणी–ऋषिः

(5) अनुत्तरितः प्रश्नः

**133.** 'अहं मित्रावरुणोभा बिभर्मि' इत्यत्र बिभर्मि पदस्य कः अर्थः ?

(1) गच्छामि (2) धारयामि

(3) पश्यामि (4) निस्सारयामि

(5) अनुत्तरितः प्रश्नः

**134.** उषस्–सूक्तस्य ऋषिः कोऽस्ति ?

(1) गौतम–ऋषिः

(2) वामदेव–ऋषिः

(3) गृत्समद–ऋषिः

(4) विश्वामित्र–ऋषिः

(5) अनुत्तरितः प्रश्नः

**135.** "यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज्जर्भुरीति ।" इत्यादि मन्त्रः कस्मात् सूक्तात् उद्धृतः ?

(1) वरुणसूक्तात् (2) उषस्सूक्तात्

(3) पृथिवीसूक्तात् (4) पर्जन्यसूक्तात्

(5) अनुत्तरितः प्रश्नः

**136.** वरुणसूक्तस्य छन्दः किम् ?

(1) अनुष्टुप् (2) गायत्री

(3) त्रिष्टुप् (4) बृहती

(5) अनुत्तरितः प्रश्नः

**137.** "रेतो दधात्योषधीषु गर्भम्" इत्यादिमन्त्रे रेतस्–शब्दस्य कोऽर्थः ?

(1) उदकम् (2) वीर्यम्

(3) तेजः (4) बलम्

(5) अनुत्तरितः प्रश्नः

138. कीदृशं वरुणं करामहे –

(1) क्षत्रश्रियं नरम् (2) घोरवर्पसम्

(3) रिशादसम् (4) दोषावस्तम्

(5) अनुत्तरितः प्रश्नः

139. "यदङ्ग त्वा भरताः संतरेयुर्गव्यन्ग्राम इषित इन्द्रजूतः ।" इत्यादिमन्त्रः कस्मात् सूक्तात् उद्धृतः ?

(1) इन्द्रसूक्तात्

(2) विश्वामित्र–नंदीसंवादसूक्तात्

(3) यमयमीसंवादसूक्तात्

(4) पृथिवीसूक्तात्

(5) अनुत्तरितः प्रश्नः

140. "शुतुद्री" इति शब्दः कस्य वाचकः ?

(1) अग्निः (2) देवता

(3) ऋषिः (4) नदी

(5) अनुत्तरितः प्रश्नः

141. "गर्भे नु नौ जनिता दंपती कर्देवस्त्वष्टा सविता विश्वरूपः ।
न किरस्य प्र भिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः ।" इति मन्त्रः कस्मिन् सूक्ते ?

(1) यमयमीसंवादसूक्ते

(2) सवितृसूक्ते

(3) पृथिवीसूक्ते

(4) पुरुव–उर्वशीसंवादसूक्ते

(5) अनुत्तरितः प्रश्नः

142. यमी यमेन सह गर्भे एव आत्मनो दाम्पत्यसम्बन्धस्य कर्तारं कं मन्यते ?

(1) प्रजापतिम्

(2) गन्धर्वम्

(3) देवान्

(4) आदित्यम्

(5) अनुत्तरितः प्रश्नः

143. रुद्रसूक्तस्य ऋषिः कोऽस्ति ?

(1) गृत्समद–ऋषिः (2) वामदेव–ऋषिः

(3) गौतम–ऋषिः (4) विश्वामित्र–ऋषिः

(5) अनुत्तरितः प्रश्नः

144. 'एना वयं पयसा पिन्वमाना अनु' इत्यत्र 'पिन्वमानापदस्य कः अर्थः ?

(1) प्रत्यागच्छन्त्यः (2) गच्छन्त्यः

(3) प्राप्तवत्यः (4) सन्तर्पयन्त्यः

(5) अनुत्तरितः प्रश्नः

145. 'अजीतोऽहतो अक्षतोऽध्यष्टाम्' इत्यत्र 'अध्यष्टा' इति शब्दः कस्य वाचकः ?

(1) द्रव्यवाचकः (2) गुणवाचकः

(3) क्रियावाचकः (4) ब्रह्मवाचकः

(5) अनुत्तरितः प्रश्नः

146. अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु ।
अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः ।।
इति मन्त्रः कस्मिन् सूक्ते वर्तते ?

(1) पुरुषसूक्ते (2) पृथिवीसूक्ते

(3) वरुणसूक्ते (4) अग्निसूक्ते

(5) अनुत्तरितः प्रश्नः

147. "यस्यामन्नं कृष्टयः सम्बभूवुः" इत्यत्र 'कृष्टयः' इति पदस्य कोऽर्थः ?

(1) मनुष्याः (2) देवाः

(3) ओषधयः (4) व्रीहियवादयः

(5) अनुत्तरितः प्रश्नः

148. "पर्जन्यः पिता स उ नः पिपर्तु" इतिमन्त्रांशः कस्मात् सूक्तात् उद्धृतः ?

(1) सूर्यसूक्तात् (2) रुद्रसूक्तात्

(3) पर्जन्यसूक्तात् (4) पृथिवीसूक्तात्

(5) अनुत्तरितः प्रश्नः

149. पृथिवीसूक्तस्य कः ऋषिः ?

(1) विश्वामित्रः (2) अथर्वा

(3) गृत्समदः (4) अङ्गिराः

(5) अनुत्तरितः प्रश्नः

150. सूर्यसूक्तस्य छन्दः किम् ?

(1) त्रिष्टुप् (2) गायत्री

(3) अनुष्टुप् (4) बृहती

(5) अनुत्तरितः प्रश्नः

## रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK